# Sadguru Shri Tyagabrahma Trishati

# सद्गुरुश्रीत्यागब्रह्मत्रिशती

## Document Information

Text title : Sadguru Shri Tyagabrahma Trishati

File name : sadgurushrItyAgabrahmatrishatI.itx

Category : deities_misc, puShpAshrIvatsan, gurudeva, trishatI

Location : doc_deities_misc

Author : Pushpa Shrivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Sadguru Sri Tyagabrahma Pushpanjali 2015

Latest update : October 19, 2023

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

October 19, 2023

*sanskritdocuments.org*

# सद्गुरुश्रीत्यागब्रह्मत्रिशती

ॐ
। श्रीरामजयम् ।
। ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।
॥ सद्गुरुश्रीत्यागब्रह्मत्रिशती ॥

ॐ रामरामाय विद्महे नामरूपाय धीमहि ।
तन्नस्सुनादःप्रचोदयात् ॥

अथ त्रिशती ।
ॐ
ॐ अद्वैतसिद्धिप्रदानन्दगुरवे नमः ।
ॐ इहलोकसायुज्यदेश्वराय नमः ।
ॐ उत्तमसङ्गीतोषोपासिताय नमः ।
ॐ एकान्तभक्त्यैश्वर्यप्रदाय नमः ।
ॐ ओंकारनादौषधाय नमः ।
ॐ कल्पनातिक्रान्त-सूक्ष्मरूपाय नमः ।
ॐ शिष्यमानस-मञ्जुसुवास-कुञ्जकुटीर-विश्रान्ताय नमः ।
ॐ शिष्यान्तर्गत-मङ्गलगुरवे नमः ।
ॐ शिष्यमनःसारमयाय नमः ।
ॐ मनोजवस-गुरुनाथाय नमः ।
ॐ व्यूतानन्यशिष्यचिन्तनाय नमः ।
ॐ शिष्यात्यन्त-भक्तिभाव-जाल-ग्रहकाय नमः । १२
ॐ शिष्यहृन्मन्दिराय नमः ।
ॐ शिष्यात्मदीपाय नमः ।
ॐ मङ्गलानुग्रह-वर्षण-दिव्यदीपाय नमः ।
ॐ शिष्यानुरागाकाराय नमः ।

ॐ तपःपुष्पोपासित-सूक्ष्मचरणाय नमः ।
ॐ शिष्यैकभाव्याभिषिक्ताय नमः ।
ॐ शिष्यैक्यभाव-दुकूलाय नमः ।
ॐ शिष्यानवरत-स्मरणार्चिताय नमः ।
ॐ सविकाश-मानसपुष्पार्पिताय नमः ।
ॐ शिष्य-जीवन-पर्यन्तासङ्ग-श्वासरूप-नाम-
पुष्पापूजित-पदाम्बुजाय नमः ।
ॐ शिष्यहृत्-पुष्पानन्यभक्ति-सौरभ-धूपाधिवासिताय नमः ।
ॐ शिष्य-हृदयोत्कूलानुराग-स्तुतिपुष्पाधूशिताय नमः । २४
ॐ शिष्याश्रान्त-चिन्तन-प्ररोह-परिवृत्ति-निवेदिताय नमः ।
ॐ शिष्य-निश्चलचित्त-नीराजिताय नमः ।
ॐ गुरुदर्शनोत्कानन्यशिष्य-दयोत्कट-परिक्षेपिणे नमः ।
ॐ शिष्यशिशुजिह्व-श्रीरामनाम-मधु-लेहयितृ-मात्रे नमः ।
ॐ शिष्य-योगक्षेमावह-पित्रे नमः ।
ॐ शिष्यासङ्ग-सङ्गीतोपासन-सम्प्राप्तिद-सद्गुरवे नमः ।
ॐ शिष्याभीष्टदैवताय नमः ।
ॐ शिष्याभीष्टसिद्धये नमः ।
ॐ मूककोकिल-शिष्य-सुमधुर-गापयित्रे नमः ।
ॐ शिष्याबलकण्ठ-घण्टानादोद्भावयित्रे नमः ।
ॐ नानाविध-रागालापन-वैचक्षण्यानुग्राहिणे नमः ।
ॐ शिष्यासङ्गजीवन-प्रणेनी-ध्रुवनक्षत्राय नमः । ३६
ॐ शिष्यासङ्ग-जीवयानाभिक्षण-सहचर-नेत्रे नमः ।
ॐ लोक-युद्धरङ्ग-शिष्यजीवन-रथ्ये नमः ।
ॐ गीतोपदेशन-गीथाचार्याय नमः ।
ॐ संसार-परिवृत्ति-क्षोभित-शिष्य-द्वीप-प्रशान्तकाय नमः ।
ॐ पादावलम्बात्यन्तभक्तावरूत्रे नमः ।
ॐ वैमनस्यापहन्त्रे नमः ।
ॐ विक्षेपापनेत्रे नमः ।
ॐ तामसराजसोत्पाटिने नमः ।
ॐ कामक्रोधरोधकाय नमः ।
ॐ लोभमोहहन्त्रे नमः ।
ॐ मदमात्सर्य-व्यवधान-विदारकाय नमः ।

ॐ शिष्य-मनोभीति-भीकराय नमः । ४८
ॐ जन्म-मृत्यु-जराधि-व्याधि-विकृति-भय-हराय नमः ।
ॐ भवरोग-समुत्थानाय नमः ।
ॐ भक्तेच्छाशक्ति-दृढीकर्त्रे नमः ।
ॐ मन्तव्य-तत्त्वोपदेष्ट्रे नमः ।
ॐ मनःशान्ति-जनयित्रे नमः ।
ॐ शरणागत-कृतान्त-दमयित्रे नमः ।
ॐ प्रत्याहार-प्रवर्धकाय नमः ।
ॐ क्षालित-शिष्यमानसाय नमः ।
ॐ यापित-मनआवृत्ति-शिष्यचित्त-चिरस्थाय नमः ।
ॐ शिष्यमानस-कल्पितवीचि-श्रीरामतारकमन्त्रसात्कर्त्रे नमः ।
ॐ श्रीरामतारकमन्त्रसात्कृत-मानस-पुष्पामोदिने नमः ।
ॐ परिपूतानन्यभागन्तःकरण-सततवासिने नमः । ६०
ॐ शरीरव्यथा-विमोक्त्रे नमः ।
ॐ शरीरात्म-भेदावबोधकाय नमः ।
ॐ प्रकृतिरूपक-शिक्षागुरवे नमः ।
ॐ ब्रह्मजिज्ञासा-परिपूरयित्रे नमः ।
ॐ चेतनीकृतैकाग्रशिष्याय नमः ।
ॐ पाटित-मायापट-भक्तात्मस्वरूप-स्फुटीकर्त्रे नमः ।
ॐ आत्मलय-प्रतिपादयित्रे नमः ।
ॐ जीवन्मुक्त्यापादन-सद्गुरवे नमः ।
ॐ निशान्त-स्वरविद्या-निशान्ताय नमः ।
ॐ अमित-नादशक्ति-मूलाय नमः ।
ॐ शब्दातीतापर्यन्त-प्रशान्तये नमः ।
ॐ प्रत्यह-प्रवृत्ति-विप्लवाधिकरण-प्रशान्तये नमः । ७२
ॐ शिष्य-मनस्तल-तुमुल-कल्लोल-चिन्तनाधस्थ-
प्रशान्त-जलधये नमः ।
ॐ अविरत-कल्पना-कलनातिक्रान्त-तूष्णींस्थानाय नमः ।
ॐ नादार्थि-लोलुपा-नीरवतास्थाय नमः ।
ॐ उपासकान्तर्गाढ-मौनाधारश्रुतये नमः ।
ॐ अवगाढ-मौनगूढ-मधुरध्वनये नमः ।
ॐ मौनोदीर्ण-मृदु-मधुर-स्वराय नमः ।

ॐ पूजकान्तरुदर्क-प्रणवनादाय नमः ।
ॐ विकस्वर-दिव्यनादाय नमः ।
ॐ भक्ताकारालय-प्रणवनाद-रेभिणे नमः ।
ॐ प्रणवरूप-भक्तान्तर्व्यापिने नमः ।
ॐ भक्तान्तःपिञ्जर-कारागुप्त-मिष्टस्वर-नादपक्ष्यखण्ड-
गानगगनाप्रयास-विस्तारयित्रे नमः ।
ॐ गुरुपाद-स्पर्शन-गानपक्ष-दायिने नमः । ८४
ॐ शिष्यान्तर्नभो-जपापुष्प-रक्तोदयादित्याय नमः ।
ॐ झगझगायमान-नादद्युतये नमः ।
ॐ अनन्त्य-नादानन्द-रोचिष्मते नमः ।
ॐ शिष्यान्तस्-सर्वकाल-श्रूयमाण-गानकोकिलाय नमः ।
ॐ शिष्यान्तर्-भावनासामोद-मञ्जरीकुञ्ज-मधुमधुर-गीत-
शिक्षागुरवे नमः ।
ॐ शिष्यसिञ्चन-दिव्यवागमृताय नमः ।
ॐ शिष्याभिषेचन-दिव्यगानामृताय नमः ।
ॐ भक्तृ-वरूथ-कृति-वरूथाय नमः ।
ॐ भक्तान्तर-प्रकाशक-प्रणेनी-नादमयूखाय नमः ।
ॐ एकान्तभक्तानन्द-स्वरविद्याऽहरहर्वर्धन-त्वरयित्रे नमः ।
ॐ एकान्तभक्त-सुस्वरगान-प्रवेशिताय नमः ।
ॐ एकान्तभक्त-भावानुग-स्तुतिपुष्पामोद-प्रवेशिताय नमः । ९६
ॐ एकान्तभक्त-भावज्ञाय नमः ।
ॐ एकान्तभक्त-भावशुद्धि-प्रतीताय नमः ।
ॐ एकान्तभक्त-भावसर्गेदंस्तोत्र-भावग्राहिणे नमः ।
ॐ सँल्लीन-मानस-सँल्लीनाय नमः ।
ॐ अनन्यशिष्य-मनोगुप्त-ध्यातामूल्य-कुनाभये नमः ।
ॐ चिदानन्दस्वरूप-नादव्यक्तये नमः ।
ॐ नामपुष्पावलि-स्रजिष्ठाय नमः ।
ॐ स्वयङ्कारित-स्तुतिपुष्पप्रकराय नमः ।
ॐ सङ्गीत-ख-घनारुण-प्राक्सन्ध्यायै नमः ।
ॐ सुधामय-कृतिपुञ्ज-चिरञ्जीविने नमः ।
ॐ सङ्गीतचरित्र-सानसिशिलोत्कीर्ण-नाम्ने नमः ।
ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः । १०८

ॐ श्रीरामनामकिरण-सङ्गीतज्ञानसूर्याय नमः ।
ॐ श्रीरामसूर्य-स्फुटित-गानवारिजाय नमः ।
ॐ श्रीरामगान-वारिजमित्राय नमः ।
ॐ श्रीरामपरत्व-ज्ञानदर्पणाय नमः ।
ॐ श्रीरामानुभूति-स्वरूपाय नमः ।
ॐ श्रीरामानुभूति-प्रगाढाय नमः ।
ॐ श्रीरामानुभूति-समग्रतायै नमः ।
ॐ श्रीरामानुभव-प्रहर्ष-मन्दस्मित-विलसित-वक्त्राय नमः ।
ॐ श्रीरामदर्शनानन्द-पूरित-क्लिन्नाक्षाय नमः ।
ॐ श्रीरामानन्यचिन्तन-सुम-सौरभ्यान-घ्राणाय नमः ।
ॐ श्रीरामनाम-श्रवण-प्रहृष्ट-श्रोत्राय नमः ।
ॐ श्रीरामनाम-रत्नहार-स्फुरित-कण्ठाय नमः । १२०
ॐ श्रीराम-रामहास-तुल्य-सप्तस्वर-मुक्ताकलाप-भूषितोरस्काय नमः ।
ॐ श्रीरामागार-रागोद्गार-रागहृदयाय नमः ।
ॐ श्रीरामार्चन-व्यापृत-सुस्वर-पुष्पहस्ताय नमः ।
ॐ श्रीरामानुग्रह-फलप्रद-भद्रपादाय नमः ।
ॐ श्रीरामान्तरङ्गाय नमः ।
ॐ श्रीरामप्रेम-स्वान्ताय नमः ।
ॐ श्रीरामप्रेमिणे नमः ।
ॐ श्रीरामाश्लिष्ट-हृष्टरोम्णे नमः ।
ॐ श्रीरामभक्त्यप्रकम्पाय नमः ।
ॐ श्रीरामभक्ति-प्रकम्पिताय नमः ।
ॐ श्रीराम-कैङ्कर्यार्पितस्वाय नमः ।
ॐ श्रीराम-नैत्यपूजनपर-न्यस्तविचाराय नमः । १३२
ॐ श्रीराम-सुगुणाक्षमाला-सुशोभिताय नमः ।
ॐ श्रीरामभद्र-गानभद्राय नमः ।
ॐ श्रीराम-सङ्गीत-सन्दानिताय नमः ।
ॐ श्रीराममूर्ति-गानभजन-रागमूर्तये नमः ।
ॐ श्रीरामनाम-गानभजन-कीर्तनप्रियाय नमः ।
ॐ श्रीरामनाम-गान-भजनप्रियाय नमः ।
ॐ श्रीरामनाम-गानप्रियाय नमः ।
ॐ श्रीरामनामप्रियाय नमः ।

ॐ श्रीरामप्रियाय नमः ।
ॐ श्रीरामभक्तप्रियाय नमः ।
ॐ श्रीरामभक्ततिलकाय नमः ।
ॐ श्रीरामभक्ति-चिरसिक्ताय नमः । १४४
ॐ श्रीरामसायुज्य-सिद्धाय नमः ।
ॐ श्रीरामभक्ति-सागर-पारमिताय नमः ।
ॐ श्रीरामप्रेमसागराय नमः ।
ॐ श्रीरामभक्तिरस-पूरित-गान-वरुणालयाय नमः ।
ॐ श्रीरामनाम-पेत्व-वर्षक-गान-मुमुचानाय नमः ।
ॐ श्रीरामानुरागप्लुति-नानाराग-कृतिप्लुतये नमः ।
ॐ श्रीराम-निमज्जन-सङ्गीत-मन्दाकाय नमः ।
ॐ श्रीराम-नामाभिपुष्प-गान-देववृक्षाय नमः ।
ॐ श्रीरामराम-सशब्द-सङ्गीत-मधूकाय नमः ।
ॐ श्रीराम-नामाविराम-गान-मधुकण्ठाय नमः ।
ॐ श्रीरामभक्तिपञ्जर-मञ्जुपाठकाय नमः ।
ॐ श्रीरामतारकनाम-सर्वकाल-ध्वननाय नमः । १५६
ॐ श्रीरामतारकनाम-गेहाय नमः ।
ॐ श्रीरामतारक-नामानन्दावरोकिणे नमः ।
ॐ श्रीरामनुत्यमरगान-वरेण्याय नमः ।
ॐ श्रीरामनाम-मिष्टपेय-पायनाय नमः ।
ॐ श्रीराम-प्रसादन-राग-प्रासाद-वप्र-कृतिपुङ्गकाराय नमः ।
ॐ श्रीरामनाम-मध्वापात-गाथश्रवसे नमः ।
ॐ श्रीरामकथासार-सागरानुराग-राग-रागराजाय नमः ।
ॐ श्रीरामराग-रागरागिणे नमः ।
ॐ श्रीरामरत्न-गायकरत्नाय नमः ।
ॐ श्रीरामानर्घ-कृतिरत्न-भूषणाय नमः ।
ॐ श्रीरामाद्भुत-गुणाद्भुत-गायकाय नमः ।
ॐ श्रीराम-कमनीयगात्र-कमनीयगायत्र-नुतिगात्रे नमः । १६८
ॐ श्रीरामराजन्य-सौखसुप्तिकाय नमः ।
ॐ श्रीरामलीला-सुरेभाय नमः ।
ॐ श्रीरामनाम-सङ्कीर्तनानन्द-तेजोरूपाय नमः ।

ॐ श्रीसीतारामस्वमूर्तये नमः ।
ॐ चराचरात्मक-श्रीराम-तथ्योपचारपर-मधुर-स्वरात्मकाय नमः ।
ॐ श्रीरघुवरपद-चिन्तनपर-धीतिमते नमः ।
ॐ पट्टाभिराम-गानाभिरामाय नमः ।
ॐ पापविराम-श्रीराम-नामाविराम-गानारामाय नमः ।
ॐ माधुर्यतर-सुस्वर-विभूषितरामाय नमः ।
ॐ मृदुतर-हृत्संस्तर-संस्तव-लालितरामाय नमः ।
ॐ मृदुतम-मानस-सुवास-सुमतूलिका-शायितरामाय नमः ।
ॐ मधुर-स्वरानन्दित-वरानन्दरामाय नमः । १८०
ॐ नुतिगीत-कदम्बकुसुम-पूजितरामाय नमः ।
ॐ वन्दित-वन्दितवन्द्य-श्रीरामाय नमः ।
ॐ छन्दितच्छन्दन-रामचन्द्रच्छन्दस्य-नामकीर्तनाय नमः ।
ॐ सर्वलोकदयानिधि-श्रीरामनुति-सङ्गीतपयोनिधये नमः ।
ॐ सुज्ञाननिधि-श्रीरामनुति-सुगाननिधये नमः ।
ॐ रिङ्गित-श्रीरामानुराग-वीचये नमः ।
ॐ सकललीलाविनोद-श्रीरामनामविनोदाय नमः ।
ॐ दोषनिवारण-सन्तोषद-रामनाम-रक्षाकलनाय नमः ।
ॐ कल्याणरामचन्द्र-गायकचन्द्राय नमः ।
ॐ मोहनाकार-श्रीराम-नामाकाराय नमः ।
ॐ हसितमुख-श्रीरामानन्द-लसितमुखाय नमः ।
ॐ गुणभरित-श्रीराम-रागभरिताय नमः । १९२
ॐ भरित-श्रीराम-सुगुणकलापाय नमः ।
ॐ रीण-रामामृतक-गीत-कण्ठाय नमः ।
ॐ कृत-रामराम-नामघोष-कृतिकृत्स-वाग्विशेषाय नमः ।
ॐ मधुरध्वनित-श्रीराम-मधुतरनाम्ने नमः ।
ॐ पावनगुण-श्रीराम-गायन-पावनगुणिने नमः ।
ॐ निरञ्जन-श्रीराम-रागरञ्जनाय नमः ।
ॐ निर्धारित-श्रीरामानवधिक-माहात्म्याय नमः ।
ॐ निर्मलरूप-श्रीराममय-निर्मलमानसाय नमः ।
ॐ रमित-स्वमानस-नूपुर-घल्कृत-रामपदागतये नमः ।
ॐ वृतिंकृत-स्वप्रकाश-श्रीराम-स्वगानपरिधये नमः ।
ॐ भराजमुख-श्रीरामानन्द-विराजमुखाय नमः ।

ॐ देवाधिदेव-श्रीरामोपासक-रागाधिदेवाय नमः । २०४
ॐ राजित-रामनामभूषाय नमः ।
ॐ जीवन-रामनामस्मरण-जागरूकाय नमः ।
ॐ जीवन-प्रतिक्षण-श्रीरामतारकनामपूरक-महात्मने नमः ।
ॐ जीवन-तान्तवोत-तारकनाम्ने नमः ।
ॐ दिगम्बर-श्रीरामावरण-दिव्य-वागम्बराय नमः ।
ॐ चिदम्बर-श्रीराम-सङ्गीतोपासन-चिदानन्दरूपाय नमः ।
ॐ चिद्विलास-श्रीरामानन्दविलासाय नमः ।
ॐ श्रीराम-सालोक्य-सङ्गीत-सार्वभौमाय नमः ।
ॐ भावाभाव-श्रीराम-भावाभातये नमः ।
ॐ ओंकारधाम-श्रीराम-नामधाम्ने नमः ।
ॐ मनश्शुन्धन-पावननाम्ने नमः ।
ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः । २१६
ॐ श्रीरामकृष्ण-गानानन्दावताराय नमः ।
ॐ कीर्तित-नामौत्कर्ष्याय नमः ।
ॐ भागवत-समूहाद्रि-दीपाय नमः ।
ॐ हरिजप-भासित-हृत्प्रसादाय नमः ।
ॐ अरिदमनाराधन-दमनमुनये नमः ।
ॐ अमृतकीर्तन-श्रीरामानुरागिणे नमः ।
ॐ मङ्गलगीतवाद्यप्रियाय नमः ।
ॐ वीणानादमोदिने नमः ।
ॐ वेणुगानलोल-सखाय नमः ।
ॐ वेणुगानलोल-लीलालोलाय नमः ।
ॐ वृन्दावन-लोलालोकन-लोलाय नमः ।
ॐ नन्दार्चित-पदयुगार्चन-गीतायुताय नमः । २२८
ॐ नन्दनीय-नन्दनन्दनीय-लीलास्तवाय नमः ।
ॐ नन्दनन्दित-नवरस-सवन-गीतानन्दिने नमः ।
ॐ नन्दित-नन्दनन्दन-नाम्ने नमः ।
ॐ नलिनदल-नयन-नवनव-पदनटन-नामगानानन्दनाय नमः ।
ॐ मन्दरधर-मन्त्रधराय नमः ।
ॐ अगराजधर-मनोधराय नमः ।
ॐ यादवकुलतिलक-गायकतिलकाय नमः ।

ॐ यदुनन्दन-नुतिचन्दनाय नमः ।
ॐ नतपोषण-नादभूषणाय नमः ।
ॐ नुतार्णवसदन-स्वरार्णवसदनाय नमः ।
ॐ नुतगीत-परमेशनुतगीताय नमः ।
ॐ गिरीशमनोहर-मनोहर-गिरीशाय नमः । २४०
ॐ विनुत-वागधिपविनुत-वागधिपाय नमः ।
ॐ माधव-माधवगान-रन्त्रे नमः ।
ॐ राघव-राग-मध्वभिषेक्त्रे नमः ।
ॐ रसिकाग्रेसर-श्रीराम-रसिकाग्रेसराय नमः ।
ॐ भूजालोल-पूजालोलाय नमः ।
ॐ धराप-गिरा-मधुपाय नमः ।
ॐ ताराधीशवदन-वदनवन्दन-स्वराधीशाय नमः ।
ॐ तरणिकुलविभूष-विभूष-मधुरतर-गीतकुलाय नमः ।
ॐ तरणिवंश-संजात-सङ्गीत-साधवे नमः ।
ॐ कंजात-बन्धु-कुलज-बन्धवे नमः ।
ॐ वरिवसित-वरवीरवीर-वरधीरधीरस्वराय नमः ।
ॐ उरगराज-शयनोपचारपर-रागराजाय नमः । २५२
ॐ शायितोरगशयन-रागशय्याय नमः ।
ॐ श्रीलोल-गुणलोलाय नमः ।
ॐ श्रीप-वाक्पाय नमः ।
ॐ श्रीश-गेयेशाय नमः ।
ॐ श्रीद-नादाय नमः ।
ॐ श्रीकलत्र-कलत्व-कलनाय नमः ।
ॐ मदनजनक-मोदन-मधुर-कीर्तनजनकाय नमः ।
ॐ धरसुतारमण-स्वरसुधारमणाय नमः ।
ॐ धराधिप-करार्चितार्चनपर-स्वराधिपाय नमः ।
ॐ रावणारि-रागरवणाय नमः ।
ॐ घननिभकाय-घननयराग-गेयाय नमः ।
ॐ गिर्याविष्यश्रीराम-प्रत्यक्षदर्शिने नमः । २६४
ॐ घृणापाङ्गानन्दार्द्रापाङ्गाय नमः ।
ॐ दशरथपुत्र-दर्शनोत्पुलकाय नमः ।
ॐ दाशरथि-रति-स्वरशरधये नमः ।

ॐ खादोऽर्णस्-स्वर-सुरनद्यै नमः ।
ॐ माधूक-मङ्गलकरामृतवाण्यै नमः ।
ॐ मधुरकीर्तन-निवह-श्रोत्रसुखातिशायिने नमः ।
ॐ निगमान्तचरणार्पण-निगमार्थसार-सुकीर्तन-निःसाराय नमः ।
ॐ नादानन्दकर-कृतिनिकराय नमः ।
ॐ नवरसनिचयि-कृतिनिचयाय नमः ।
ॐ लसत्-स्वरलयच्छवि-कृतिचयाय नमः ।
ॐ वेदशास्त्र-तत्त्वसार-सङ्ग्रह-कृतिसङ्घाय नमः ।
ॐ अविभेद्य-भक्तिसङ्गीत-सङ्गाङ्काय नमः । २७६
ॐ भक्तिरहित-सङ्गीतविद्वद्वितति-दूराय नमः ।
ॐ वरभक्तकवये नमः ।
ॐ नादोपासन-परमता-नादि-परमेष्ठिने नमः ।
ॐ शीलितासङ्ग-सङ्गीतोपासन-स्वामिने नमः ।
ॐ जीवितोदाहृत-भगवद्गीताय नमः ।
ॐ ज्ञानभक्तिवैराग्य-दृढचित्ताय नमः ।
ॐ दृढविक्रमाय नमः ।
ॐ विषवत्-त्यक्त-कनकधनाय नमः ।
ॐ निन्दित-परनिन्दनाय नमः ।
ॐ विवृत-निष्कामपूजनाय नमः ।
ॐ उदाहृतोत्तम-भक्तिमार्ग-जीवनाय नमः ।
ॐ प्रेमभक्ति-समन्विताय नमः । २८८
ॐ भजनपरान्तरङ्गाय नमः ।
ॐ घण्टानादवर्षि-मधुरकण्ठाय नमः ।
ॐ परादि-वाक्स्वरूप-परात्पराय नमः ।
ॐ श्रीरामभक्त्युद्यान-नामपुष्पाकर-सुकीर्तनाकाराय नमः ।
ॐ गीताभिपुष्प-ज्ञानभक्तितरवे नमः ।
ॐ पादपतित-तापहरच्छाय-पादपाय नमः ।
ॐ संसारताप-धूनमानस-सङ्गीतसरये नमः ।
ॐ संसारतापापह-स्वर्णगङ्गायै नमः ।
ॐ स्नानपानानन्दद-वाग्गङ्गायै नमः ।
ॐ दर्शन-मुक्तिद-गुरुगङ्गायै नमः ।
ॐ पादावनामानुराग-रागसुधारस-प्रोक्षणाय नमः ।

ॐ झरासार-सुस्वरामृतधारायै नमः । ३००
ॐ शोकानलामृतगानवरुणाय नमः ।
ॐ दिवारात्र-चरण-स्मरणपरानुषङ्गि-हृत्सागर-चन्द्राय नमः ।
ॐ दुःखध्वान्त-नभोमणये नमः ।
ॐ तामससहायान्ताय नमः ।
ॐ नादार्थि-हृदन्त-भेशाय नमः ।
ॐ नादोपासनोत्सुकैकान्त्येकायनाय नमः ।
ॐ नादार्थि-नाधसे नमः ।
ॐ नाधमान-नादविद्या-राद्धिदाय नमः ।
ॐ भावगम्भीर-स्पृहित-गुरुदेवाय नमः ।
ॐ भक्तृ-हृद्रोचना-देवतातये नमः ।
ॐ विराजित-भक्तिहृत्पुष्प-भद्रासनाय नमः ।
ॐ लसत्सुकीर्तन-रत्नमकुटाय नमः । ३१२
ॐ उपासक-भक्तिस्तुति-भर्माम्बराय नमः ।
ॐ भक्तिहृत्-पुष्पाधिवासि-सङ्गीत-सुगन्धाय नमः ।
ॐ अनुराग-नुतिपुष्पावलि-रागामोदनाय नमः ।
ॐ सुस्वर-पुष्पावासित-नामावल्यामोदिताय नमः ।
ॐ रक्तानुराग-स्तुतिपुष्पालय-दैवताय नमः ।
ॐ शिष्यशिर-स्पर्शनाशीकर-शुभकराय नमः ।
ॐ शिष्याज्ञाचक्र-स्पर्शन-ज्ञानशक्त्युत्तेजन-
ज्ञानगुरवे नमो नमः ।
ॐ मूलाधारस्थ-कुण्डलिनीरूप-नादशक्त्युत्थापन-नादगुरवे नमो नमः ।
ॐ कुण्डलिनीरूप-मूलाधारोत्थान-नादशक्तये नमो नमः ।
ॐ सहस्रारस्थित-नादज्योतिर्-गुरुब्रह्मणे नमो नमः ।
ॐ सेवितानत्युक्तिस्तुतिमण्डल-नादपरमात्मने नमो नमः ।
ॐ श्रीत्यागब्रह्मसद्गुरुस्वामिने नमो नमः ॥ ३२४
ॐ

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया पुष्पया
सुभक्त्या कृता त्रिशतिनामावलिः गुरुचरणपुष्पे
समर्पिता ।
ॐ

शुभमस्तु ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Sadguru Shri Tyagabrahma Trishati*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on October 19, 2023

Please send corrections to *sanskrit@cheerful.com*